संस्कृत-वार्ता:

05.06.2024

सायम् - 06:20

मुख्यवार्ता:

- नव दिल्ल्यां प्रधानमन्त्रिणः नरेन्द्रमोदिनः आवासे एनडीए-इति घटकानाम् उपवेशनं प्रचलति।
- भाजपेति दलस्य वरिष्ठनेता महाराष्ट्रस्य उपमुख्यमन्त्री च देवेन्द्र फडणवीस: राज्ये दलस्य असन्तोष प्रदर्शनस्य पूर्णं उत्तरदायित्वं स्वीकृतवान्।
- ओडिशायाः -मुख्यमन्त्रिणा नवीनपटनायकेन अद्य भुवनेश्वर स्थिते राजभवने राज्यपालाय रघुबरदासाय स्वीयत्यागपत्रं प्रदत्तम्।
- त्रयोविंशत्यधिक द्विसहस्र, चतुर्विंशत्यधिक द्विसहस्र तमे वर्षे देशे समस्त सस्योत्पादनं अष्टाशीत्यधिक-द्विशतोत्तर-त्रिसहस्र-लक्ष-टन-परिमितं यावत् भवति इति अनुमानम् अस्ति ।
- विंशति-प्रतिविंशति विश्व-चषक-प्रतिस्पर्धायां भारतीयदलम् आयरलैण्डदलेन सह न्यूयॉर्कनगरे प्रतिस्पर्धयिष्यति।

एनडीए-उपवेशनं

नव दिल्ल्यां प्रधानमन्त्रिणः नरेन्द्रमोदिनः आवासे एनडीए-इति घटकानाम् उपवेशनं प्रचलति। उपवेशने नेतारः तृतीयवारं क्रमशः नरेन्द्रमोदिनः नेतृत्वे नूतनसर्वकारस्य निर्माणार्थं भविष्याधारित कार्यपद्धत्यां चर्चां करिष्यन्ति। तेलुगु देशम पार्टी (टीडीपी) प्रमुख, एन चंद्रबाबू नायडू, जनता दल (युनाइटेड) प्रमुखः एवं बिहारस्य मुख्यमंत्री, नीतीश कुमारः एवं लोकजनशक्ति पार्टी (रामविलास) प्रमुख:, चिराग पासवान: अपि च एनडीए घटकेत्यस्य अन्ये नेतारः सम्मिलिताः सन्ति।

प्रधानमन्त्री-त्यागपत्र

प्रधानमन्त्री नरेन्द्रमोदी अद्य राष्ट्रपतिभवने राष्ट्रपति द्रौपदी मुर्मू इत्यनया सह मिलित्वा केन्द्रीयमन्त्रिपरिषदा सह स्वीयं त्यागपत्रं प्रदत्तवान्। राष्ट्रपतिः त्यागपत्रं स्वीकृत्य प्रधानमन्त्रिणः केन्द्रीयमन्त्रिपरिषदा च नूतनसर्वकारस्य संघटनम् यावत् पदे यथावदेव भवितुम् आग्रहं कृतवती।

देवेन्द्र फडणवीस

भाजपेति दलस्य वरिष्ठनेता महाराष्ट्रस्य उपमुख्यमन्त्री च देवेन्द्र फडणवीस: राज्ये दलस्य असन्तोष प्रदर्शनस्य पूर्णं उत्तरदायित्वं स्वीकृतवान्। सः उपमुख्यमन्त्रीपदात् त्यागपत्रं दातुं प्रस्तावम् अयच्छत्, यदि केन्द्रीयनेतृत्वं अनुमतिं प्रदास्यति तर्हि सः पदात् त्यागपत्रं दास्यति इति च अवदत्। सः अवदत् यत् त्यागपत्रस्य अनन्तरं सः राज्ये आगामि-विधानसभा-निर्वाचनस्य प्रचारार्थं स्वसमयं प्रदस्यति इति।

मतगणना

चतुर्विंशत्यधिक-द्विसहस्रतम वर्षस्य लोकसभा-निर्वाचनस्य मतगणनाया: घोषणानन्तरम् सर्वकारस्य निर्माणार्थं प्रयत्ना: तीव्रा: अभवन्। त्रिचत्वारिंशदधिक-पञ्चशतं लोकसभासनानां परिणामा: उद्घोषिता:। एन.डी.ए इत्यनेन दलेन द्विनवत्यधिक-द्विशतम् आसनानि विजित्य अतिमतं प्राप्तम्। इण्डिसंयुति: त्रयस्त्रिंशदधिक-द्विशतं आसनानि विजितवत्। भारतीय जनतापार्टीति दलेन एकाकी एव चत्वारिंशदधिक द्विशतं आसनानि गृहीतानि। तेलुगु-देशम-पार्टीति दलेन षोडश, अपि च जदयूदलेन द्वादश आसनानि विजितानि। तत्रैव कांग्रेसदलेन नवनवति: समाजवादी-पार्टीति-दलेन सप्तत्रिंशत्, तृणमूल-कांग्रेस दलेन नवविंशति:, डी.एम्.के. दलेन च द्वाविंशति: आसनानि विजितानि।

ओडिशा-त्यागपत्रम् :

ओडिशायाः -मुख्यमन्त्रिणा नवीनपटनायकेन अद्य भुवनेश्वर स्थिते राजभवने राज्यपालाय रघुबरदासाय स्वीयत्यागपत्रं प्रदत्तम्। राज्ये सद्य एव समाप्ते विधानसभानिर्वाचने स्वपक्षस्य बीजुजनतादलस्य पराजयानन्तरं तस्य त्यागपत्रं आगतम्। ध्येयं वर्तते यत् श्रीपटनायक: ओडिशाराज्यस्य सर्वाधिकदीर्घकालं यावत् मुख्यमन्त्री रूपेण अस्ति यः पञ्चवारमपि कार्यं कृतवान्, यो हि चतुर्विंशतिः वर्षाणि त्रयः मासाः च प्रसृतः। सः प्रथमवारं द्विसहस्रतमे वर्षे मार्चमासस्य पंचमे दिनाङ्के ओडिशा-राज्यस्य मुख्यमन्त्रीरूपेण शपथ ग्रहणं कृतवान् आसीत्। बीजुजनतादलस्य भाजपा-दलेन द्वारा आश्चर्यजनकपराजयः अभवत्। ओडिशा-विधानसभायां भाजपेति दलेन सप्तचत्वारिंशदधिकैक शत् आसनेषु अष्टसप्ततिः आसनानि विजितानि।

कृषिमन्त्रालय

त्रयोविंशत्यधिक द्विसहस्र, चतुर्विंशत्यधिक द्विसहस्र तमे वर्षे देशे समस्त सस्योत्पादनं अष्टाशीत्यधिक-द्विशतोत्तर-त्रिसहस्र-लक्ष-टन-परिमितं यावत् भवति इति अनुमानम् अस्ति । कृषिमन्त्रालयेन प्रकाशितस्य प्रमुख-कृषि-सस्यानां तृतीयस्य अग्रिमानुमानस्य अनुसारं समस्त-तण्डुलोत्पादनं सप्तषष्ट्याधिक-त्रिशतोत्तर-एक-सहस्र-लक्षटन-परिमितं भविष्यतिती अनुमानम् अस्ति। गोधूमस्य उत्पादनं ऊनविंशत्यधिकैक शतोत्तर एक सहस्र लक्ष टन परिमितात् अधिकं भवति इति अनुमानितम् अस्ति।

## विश्व-पर्यावरण-दिवस

अद्य विश्व-पर्यावरण-दिवसो वर्तते। अयं हि दिवस: पर्यावरणं प्रति जागरूकतां संवर्धयितुं पर्यावरण-सम्बद्ध-प्रसङ्गान् च आधृत्यैव आमान्यते। संयुक्तराष्ट्रस्य नेतृत्वे अयं एको वैश्विककार्यक्रमो वर्तते। अस्य दिनस्यारम्भ: संयुक्त-राष्ट्र-महासभा द्वारा द्विसप्तत्यधिक-नवदशतमे वर्षे मानव-पर्यावरणे स्टॉकहोम-सम्मेलनावधौ जात:।

## ऋतुविभागः

भारत ऋतु विज्ञान विभागेन आगामिषु पञ्चदिवसेषु देशस्य उत्तर पश्चिमीयभागेशु विद्युत् द्योतनेन, तीव्रवायुना च सह वृष्टेः पूर्वानुमान: कृत: । अस्मिन् एव काले उत्तरपश्चिमीयपूर्वभारतस्य च केषुचित् भागे न्यून तापतरङ्गस्य स्थितिः यथावदेव भवितुं शक्नोति। विभागेन उक्तं यत्,पश्चिम विक्षोभस्य समीपागमनकारणात जम्मू-कश्मीर, लद्दाख, गिल्गित, बाल्तिस्तान, मुजफ्फराबाद, हिमाचलप्रदेश, उत्तराखण्ड, पञ्जाब, हरियाणा, राजस्थान, उत्तरप्रदेश इत्येतेषु राज्येषु अस्य मासस्य अष्ट दिनाङ्कपर्यन्तं वज्रपातेन, विद्युत्, वायुप्रवाहेन च सह निम्नवृष्ट्याः अतीव सम्भावना विद्यते। दिल्ल्यां सम्प्रति सामान्यतया मेघाच्छादित आकाशेन वज्रपातेन च सह वृष्टिः भवितुं शक्नोति इति । राष्ट्रराजधानीयां अधिकतमं तापमानं प्रायः त्रिचत्वारिंशत् डिग्री सेल्सियस मितं भवितुं शक्नोति ।

## विजेता-देशा:

विश्वस्य अनेकै: नेतृभि: लोकसभा-निर्वाचने सततं तृतीयवारमपि विजयस्य प्राप्तेरनन्तरं प्रधानमन्त्रिणे नरेन्द्रमोदिने अपि च भारतीयजनतापार्टीति दलाय वर्धापनानि प्रदत्तानि। इटली-मॉरिशस-भूटान-नेपाल-मालदीव-श्रीलंका-देशा: प्रधानमन्त्रिणं स्वीय-शुभकामना: प्रख्यापितवन्त:। एकस्मिन् सञ्चारसन्देश पटले श्रीलंकाया: राष्ट्रपति: रानिलविक्रमसिंघे: शुभकामना: प्रयच्छन् भारतेन सह सुदृढ-सहभागित्वाय कामनां कृतवान्। भूटानस्य प्रधानमन्त्रिणा शेर्रिंग-तोबगे इत्येननानि उभयो: देशयोर्मध्ये स्थापित-सम्बन्धान् इतोऽपि सुदृढीकर्तुं निज-आशा प्रकटिता। प्रधानमन्त्री नरेन्द्रमोदी अपि प्रदत्तशुभकामनाभ्य: विश्वनेतृन् प्रति स्वकृतज्ञतां प्रकटितवान् उक्तवान् च यत् भविष्यकालिके कस्मिन्नपि कार्ये असौ देशै: सह मिलित्वा कार्यं निष्पादयिष्यति।

## नीट-यूजी-परिणाम

राष्ट्रिय-परीक्षा-अभिकरणं चिकित्सकीय-स्नातक-प्रवेश-परीक्षाया: नीट-यूजी-इत्याख्याया: परिणाम: उद्घोषित:। अभ्यर्थिन: exams.nta.ac.in/NEET इत्यस्मिन् अन्तर्जालपटले द्रष्टुं शक्यन्ते। इयं परीक्षा मईमासे पञ्चमे दिनांके आयोजिता।

## विश्व-चषक-प्रतिस्पर्धा

विंशति-प्रतिविंशति विश्व-चषक-प्रतिस्पर्धायां भारतीयदलम् अद्य स्वीयाभियानस्य शुभारम्भो करिष्यति। न्यूयॉर्कनगरे भारतस्य सामुख्यं आयरलैण्डदलेन सह भविष्यति। प्रतिस्पर्धाया: प्रसारणं रात्रौ अष्टवादनत: भविष्यति। ह्य: जाते द्वन्द्वे नीदरलैण्ड दलेन नेपालदलं षड्-स्तोभै: पराजितम्।

।। इति वार्ता: ।।